१४

अजन्तनपुंसकलिङ्गम्

प्रस्तावना

पूर्वस्मिन् पाठे वयम् अजन्तस्त्रीलिङ्गप्रकरणम् आलोचितवन्तः। अस्मिन् पाठे अजन्तनपुंसकलिङ्गप्रकरणविषये आलोचनां कुर्मः। अस्मिन् प्रकरणेऽपि प्रत्याहारक्रमेण शब्दानां विचारः प्रस्तूयते। क्लीबलिङ्गकानां शब्दानाम् अधिकः भेदः नास्ति। एतेषां शब्दानाम् इदं वैशिष्टं यत् प्रथमाद्वितीययोः विभक्त्योः समानरूपाणि भवन्ति। किञ्च तृतीयादिषु विभक्तिषु प्रायः पुंलिङ्गवत् रूपाणि भवन्ति। क्लीबलिङ्गे विद्यमानानां शब्दानां पुंलिङ्गशब्देभ्यः येषु स्थलेषु विशेषता वर्तते तदत्र आलोच्यते। तथैव एतेषां शब्दानां रूपाणि कथं भवन्ति इति विचाराय प्रकरणमिदं प्रारभ्यते।

उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- अजन्तक्लीबलिङ्गे शब्दानां रूपाणि कथं भवन्ति इति जानीयात्।
- नपुंसके कदा ह्रस्वः भवति इति ज्ञातुं शक्नुयात्।
- असमानपदेऽपि कदा णत्वं भवति इति जानीयात्।
- प्रत्ययस्य कदा लुक्श्लुलुपः भवति इति बोद्धुं पारयेत्।
- कदा प्रत्ययलोपे प्रत्ययाश्रितकार्यं न भवति इति जानीयात्।
- नपुंसकलिङ्गेऽपि कदा सर्वनामस्थानसंज्ञा भवति इति ज्ञातुं शक्नुयात्।

॥ज्ञान॥

[१४.१] अतोऽम्॥ (७.१.२४)

सूत्रार्थः- अतोऽङ्गात्क्लीबात्स्वमोरम्स्यात् इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अतः अम् इति छेदः। अस्मिन् सूत्रे द्वे पदे स्तः। अतः इति पञ्चम्येकवचनान्तं पदम्। अङ्गस्य इत्यस्य अधिकारे सूत्रमिदं विद्यते। तेन अङ्गस्य इत्यनुवर्तते तस्य च पञ्चम्येकवचनतया विपरिणामः भवति। अतः इति अङ्गविशेषणम्। तेन तदन्तविधिना अदन्तस्य अङ्गस्य इत्यर्थो लभ्यते। अम् इति प्रथमैकचनान्तं पदम्। स्वमोर्नपुंसकात् इतीदं सूत्रमनुवर्तते। नपुंसकात् इति पञ्चम्येकवचनान्तं पदम्। स्वमोः इति षष्ठीद्विवचनान्तं पदम्। सुश्च अम् च इति स्वमौ, तयोः स्वमोः इति

इतरेतरद्वन्द्वसमासः। तेन सूत्रार्थः भवति अदन्तात् नुपंसकात् अङ्गात् स्वमोः अमादेशः भवति। अमादेशः अनेकाल् अस्ति। तेन अनेकाल्शित्सर्वस्य इत्यनया परिभाषया सर्वादेशः इति लभ्यते। स्वमोर्नपुंसकात् इत्यनेन सूत्रेण सुप्रत्ययस्य तथा अम्प्रत्ययस्य लुक् प्राप्तः। परन्तु अनेन सूत्रेण अदन्तशब्देभ्यः स्वमोः अमादेशः विधीयते। सूत्रमिदं स्वमोर्नपुंसकात् इत्यस्य बाधकं भवति। अम्प्रत्ययस्य पुनः अमादेशः कुतः इति प्रश्नः भवति। अत्र उच्यते स्वमोर्नपुंसकात् इत्यनेन प्राप्तस्य लुकः बाधनार्थम् अमादेशः विहितः इति।

उदाहरणम् - ज्ञानम्।

सूत्रार्थसमन्वयः - अवबोधनार्थकात् क्र्यादिगणपठितात् ज्ञा अवबोधने इति धातोः भावे ल्युटि अनुबन्धलोपे ज्ञा यु इति भवति। ततः युवोरनाकौ इत्यनेन सूत्रेण यु-इत्यस्य अनादेशे ज्ञान इति शब्दः निष्पद्यते। ज्ञानशब्दः भावे ल्युडन्तः, तस्मात् तस्य नित्यं नपुंसकलिङ्गं भवति। ल्युट्-प्रत्ययः कृत्प्रत्ययः अस्ति। अतः ज्ञानशब्दः कृदन्तः अस्ति। तेन अस्य कृत्तद्धितसमासाश्च इति प्रातिपदिकसंज्ञा भवति। ततः अस्य प्रथमैकवचनविवक्षायां सुप्रत्यये ज्ञान स् इति स्थिते स्वमोर्नपुंसकात् इत्यनेन प्राप्तं लुकं प्रबाध्य अनेन प्रकृतेन सूत्रेण सोः अमादेशः भवति। ततः मकारस्य हलन्त्यम् इत्यनेन सूत्रेण इत्संज्ञां प्राप्नोति। तस्य न विभक्तौ तुस्माः इत्यनेन सूत्रेण निषेधः भवति। ततः ज्ञान अम् इति जाते अमि पूर्व इत्यनेन पूर्वरूपे ज्ञानम् इति रूपं सिद्ध्यति।

[१४.२]   नपुंसकाच्च॥ (७.१.१९)

सूत्रार्थः- क्लीबात्परस्यौङः शी स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। नपुंसकात् च इति छेदः। चकारे परे तकारस्य स्तोः श्चुना श्चुः इत्यनेन चकारः अभवत्। पदद्वयात्मकेऽस्मिन् सूत्रे नपुंसकात् इति पञ्चम्यन्तं पदम्। चेति अव्ययपदम्। अङ्गस्य इत्यस्य अधिकारे सूत्रमिदं विद्यते। तस्य पञ्चम्यन्ततया विपरिणामः भवति। औङ आपः इत्यस्मात् सूत्रात् औङः इति षष्ठ्येकवचनान्तं पदम् अनुवर्तते। जसः शी इत्यस्मात् सूत्रात् शी इति प्रथमान्तं पदम् अनुवर्तते। तेन अस्य सूत्रस्य अर्थो भवति नपुंसकात् अङ्गात् परस्य औङ्प्रत्यययोः शी इत्यादेशो भवति इति। प्रथमायाः द्विवचनस्य तथा द्वितीयायाः द्विवचनस्य औङ् इति संज्ञा अस्ति इति औङ आप इत्यस्मिन् सूत्रे प्रतिपाद्यते।

उदाहरणम्- ज्ञाने।

सूत्रार्थसमन्वयः - ज्ञानशब्दस्य प्रथमाद्विवचने ज्ञान औ इत्यवस्थायां प्रकृतसूत्रेण शी इत्यादेशः भवति। ततः शकारस्य लशक्वतद्धिते इत्यनेन इत्संज्ञायां तस्य लोपः इत्यनेन तस्य लोपे ज्ञान ई इति स्थितिः भवति। तत्र शी-इत्यस्य स्थानिवद्भावेन सुप्त्वं विद्यते। तेन सुडनपुंसकस्य इत्यत्र नपुंसकस्य ग्रहणाभावात् ई इत्यस्य सर्वनामस्थानसंज्ञा नास्ति। परन्तु अजादित्वात् यचि भम् इत्यनेन ज्ञानशब्दस्य भसंज्ञा जायते। तदा -

[१४.३] यस्येति च॥ (६.४.१४८)

सूत्रार्थः- भस्य इवर्णावर्णयोः लोपः स्यादीकारे तद्धिते च परे इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। यस्य ईति च इति छेदः। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। यस्य इति षष्ठ्येकवचनान्तं पदम्। इश्च अश्च इति यम्, समाहारद्वन्द्वसमासः। तस्य इति यस्य इवर्णस्य अवर्णस्य इत्यर्थः। ईति इति सप्तम्येकवचनान्तं पदम्। च इति अव्ययपदम्। भस्य इत्यस्य अधिकारे सूत्रमिदं विद्यते। नस्तद्धिते इत्यस्मात् सूत्रात् तद्धिते इति सप्तम्यन्तं पदम् अनुवर्तते। अल्लोपोऽनः इत्यस्मात् सूत्रात् लोपः इति प्रथमान्तं पदम् अनुवर्तते। तेन अस्य सूत्रस्य ईति तद्धिते च परे भसंज्ञकस्य इवर्णस्य अवर्णस्य च लोपः भवति इति सूत्रार्थो लभ्यते।

उदाहरणम् - ज्ञाने।

सूत्रार्थसमन्वयः - ज्ञान ई इत्यत्र ईति परे भसंज्ञकस्य अकारस्य प्रकृतसूत्रेण लोपः प्राप्नोति। ततः औङः श्यां प्रतिषेधो वाच्यः इत्यनेन वार्तिकेन औङः स्थाने विहितस्य शी-इत्यादेशस्य यस्येति च इत्यनेन सूत्रेण लोपस्य बाधः भवति। ततः आद्गुणः इत्यनेन सूत्रेण गुणे एकादेशे ज्ञाने इति रूपं सिद्ध्यति।

[१४.४] जश्शसोः शिः॥ (७.१.२०)

सूत्रार्थः- क्लीबादनयोः शिः स्यात् इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। जश्शसः शि इति छेदः। अस्मिन् सूत्रे द्वे पदे स्तः। जश्शसोः इति षष्ठीद्विवचनान्तं पदम्। जश्च शश्च इति जशशसौ तयोः जश्शसोः इति इतरेतरद्वन्द्वसमासः। शि इति प्रथमैकवचनान्तं पदम्। स्वमोर्नपुंसकात् इत्यस्मात् नपुंसकात् इति पञ्चम्यन्तं पदम् अनुवर्तते। तेन अस्य सूत्रस्य नपुंसकात् जश्शसोः शि इत्यादेशः भवति इत्यर्थो भवति। शि-इत्यादेशः अनेकाल् अस्ति। तेन अनेकाल्शित्सर्वस्य इत्यनया परिभाषया सर्वादेशः भवति। शि-इत्यादेशस्य स्थानिवद्भावात् विभक्तिसंज्ञा भवति। तेन लशक्वतद्धिते इत्यनेन सूत्रेण इत्संज्ञा भवति। तेन तस्य लोपः इत्यनेन तस्य लोपः भवति।

उदाहरणम्- ज्ञानानि।

सूत्रार्थसमन्वयः - ज्ञानशब्दस्य प्रथमाबहुवचने जस्प्रत्यये प्रकृतसूत्रेण जसः शि इत्यादेशे ज्ञान शि इति स्थिते अनुबन्धलोपे ज्ञान इ इति स्थितिः भवति। तदा -

पाठगतप्रश्नाः-१

अत्र केचित् प्रश्नाः प्रदीयन्ते-

१. ज्ञानम् इत्यत्र अमादेशः केन सूत्रेण विधीयते?

२. अतोऽम् इति सूत्रं कस्य अपवादः?

३. नपुंसकाच्च इति सूत्रस्य अर्थं लिखत।

४. नपुंसकाच्च इत्यनेन सूत्रेण किं विधीयते?

५. नपुंसकलिङ्गे जसः शि-आदेशः केन सूत्रेण विधीयते?

६. यस्येति च इति सूत्रस्य अर्थं लिखत।

[१४.५] शि सर्वनामस्थानम्॥ (१.१.४२)

सूत्रार्थः- शि इत्येतत् सर्वनामस्थानसंज्ञं स्याद् इति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। शि सर्वनामस्थानम् इति छेदः। अस्मिन् सूत्रे द्वे पदे स्तः। शि इति प्रथमैकवचनान्तं पदम्। सर्वनामस्थानम् इत्यपि प्रथमैकवचनान्तं पदम्। तेन अस्मात् सूत्रात् नपुंसकलिङ्गे विधीयमानस्य जशः स्थाने शि इत्यस्य सर्वनामस्थानसंज्ञा भवति इत्यर्थो लभ्यते। नपुंसकलिङ्गे जसः सर्वनामस्थानसंज्ञा न भवति इति सुडनपुंसकस्य इत्यस्मिन् सूत्रे प्रतिपादितम्। शसः सुट्त्वाभावात् तस्यापि कस्मिन्नपि लिङ्गे सर्वनामस्थानसंज्ञा न भवति। अतः जश्शसोः स्थाने विहितस्य शि इत्यादेशस्य अपि सर्वनामस्थानसंज्ञा भवतु इत्येतदर्थं सूत्रमिदं प्रारभ्यते।

उदाहरणम् - ज्ञान इ इत्यवस्थायां शि इत्यस्य प्रकृतसूत्रेण सर्वनामस्थानसंज्ञा जायते। तदा -

[१४.६] नपुंसकस्य झलचः॥ (७.१.७२)

सूत्रार्थः- झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे इति।

सूत्रव्याख्या- सर्वनामस्थानसंज्ञकप्रत्यये परे झलन्तनपुंसकलिङ्गशब्दस्य अजन्तनपुंसकलिङ्गशब्दस्य च नुमागमः भवति। इदं विधिसूत्रम्। नपुंसकस्य झलचः इति छेदः। अस्मिन् सूत्रे द्वे पदे स्तः। नपुंसकस्य इति षष्ठ्येकवचनान्तं पदम्। झलचः इत्यपि षष्ठ्येकवचनान्तं पदम्। झल् च अच् च झलच् तस्य झलच इति समाहारद्वन्द्वसमासः। झलचः इति नपुंसकस्य इत्यत्र विशेषणत्वेन अन्वेति। तेन विशेषणत्वात् तदन्तविधिना झलन्तस्य अजन्तस्य च इत्यर्थो लभ्यते। इदितो नुम् धातोः इत्यस्मात् सूत्रात् नुम् इति प्रथमान्तं पदम् अनुवर्तते। उगिदचां सर्वनामस्थाने इत्यस्मात् सूत्रात् सर्वनामस्थाने इति सप्तम्यन्तं पदम् अनुवर्तते। तेन अस्य सूत्रस्य सर्वनामस्थाने परे झलन्तस्य अजन्तस्य च नपुंसकस्य नुमागमः भवति। नुम् इत्यत्र मित्त्वात् मिदचोऽन्त्यात्परः इत्यनया परिभाषया अन्त्याद् अचः परः नुमागमः भवति इत्यर्थो लभ्यते।

उदाहरणम् - ज्ञानानि।

सूत्रार्थसमन्वयः - ज्ञान इ इत्यत्र सर्वनामस्थानसंज्ञकस्य अजन्तस्य नपुंसकलिङ्गस्य प्रकृतसूत्रेण नुमागमः भवति। मित्त्वात् मिदचोऽन्त्यात्परः इत्यनया परिभाषया परिष्कृतेन अन्त्यात् अचः नुमागमे अनुबन्धलोपे ज्ञान न् इ इति स्थितिः भवति। तदा -

[१४.७] सर्वनामस्थाने चासम्बुद्धौ॥ (६.४.८)

सूत्रार्थः- नान्तस्योपधायाः दीर्घः स्यादसंम्बुद्धौ सर्वनामस्थाने इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। सर्वनामस्थाने च असम्बुद्धौ इति छेदः। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। सर्वनामस्थाने इति सप्तम्येकवचनान्तं पदम्। असम्बुद्धौ इति सप्तम्येकवचनान्तं पदम्। न सम्बुद्धिः असम्बुद्धिः नञ्तत्पुरुषसमासः, तस्मिन् असम्बुद्धौ इति। सम्बुद्धिभिन्ने इत्यर्थः। च इति अव्ययपदम्। नोपधायाः इतीदं सूत्रम् अनुवर्तते। नः इति लुप्तषष्ठीकं पदम्। अङ्गस्य इत्यधिक्रियते। तच्च न इत्यत्र विशेष्यत्वेन अन्वेति। तेन तदन्तविधिना नान्तस्य अङ्गस्य इत्यर्थो लभ्यते। ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यस्मात् सूत्रात् दीर्घः इति प्रथमान्तं पदम् अनुवर्तते। तेन न उपधायाः दीर्घः असम्बुद्धौ सर्वनामस्थाने इति सूत्रसमन्वयः भवति। तेन अस्य सूत्रस्य नान्तस्य उपधायाः दीर्घः भवति सम्बुद्धिभिन्ने सर्वनामस्थाने परे इत्यर्थः भवति।

उदाहरणम् - ज्ञानानि।

सूत्रार्थसमन्वयः - ज्ञान न् इ इत्यत्र शिप्रत्ययः सम्बुद्धिभिन्नः सर्वनामस्थानभिन्नः अस्ति। तेन अनेन सूत्रेण नान्तस्य उपधायाः दीर्घे आकारे ज्ञाना न् इ इति स्थितिः भवति। ततः वर्णसम्मेलने ज्ञानानि इति रूपं सिद्ध्यति।

ज्ञानशब्दस्य सम्बोधनैकवचने सुप्रत्यये अनुबन्धलोपे हे ज्ञान स् इति स्थितिः भवति। ततः स्वमोर्नपुंसकात् इत्यनेन सम्बुद्धेः लुक् प्राप्तः। परन्तु परत्वात् लोपं बाधित्वा अतोऽम् इत्यनेन सूत्रेण सुप्रत्ययस्य अमादेशे ज्ञान अम् इति स्थितिः भवति। ततः अमि पूर्व इत्यनेन पूर्वरूपे हे ज्ञानम् इति स्थितिः भवति। ततः एङ्ह्रस्वात्सम्बुद्धेः इत्यनेन ह्रस्वात् परस्य सम्बुद्धेः हलः मकारस्य लोपे हे ज्ञान इति रूपं सिद्ध्यति।

सम्बोधनद्विवचने औप्रत्यये पूर्ववत् हे ज्ञाने इति रूपं भवति, बहुवचने च जस्प्रत्यये हे ज्ञानानि इति रूपं भवति।

द्वितीयैकवचने अम्प्रत्यये अमः लुकं प्रबाध्य अतोऽम् इत्यनेन अमादेशे पूर्वरूपे ज्ञानम् इति रूपम्। द्विवचने औट्प्रत्यये अनुबन्धलोपे प्रथमाद्विवचनवत् ज्ञाने इति रूपं सिद्ध्यति। बहुवचने शस्प्रत्यये जश्शसोः शि इत्यनेन शि-इत्यादेशे प्रथमाबहुवचनवत् ज्ञानानि इति रूपं सिद्ध्यति।

अन्येषु वचनेषु तु रामशब्दवत् ज्ञानेन, ज्ञानाभ्याम्, ज्ञानैः, ज्ञानाय, ज्ञानाभ्याम्, ज्ञानेभ्यः, ज्ञानात्, ज्ञानाभ्याम्, ज्ञानेभ्यः, ज्ञानस्य, ज्ञानयोः, ज्ञानानाम्, ज्ञाने, ज्ञानयोः ज्ञानेषु इत्यादीनि रूपाणि भवन्ति।

।।श्रीपा।।

सूत्रावतरणम् - श्रियं पातीति श्रीपाशब्दः विश्वपाशब्दवत् क्विप्प्रत्ययान्तः विच्प्रत्ययान्तो वा। अस्य शब्दस्य विशेषणरूपेण व्यवहारः भवति। तस्मात् अस्य त्रिषु एव लिङ्गेषु व्यवहारः भवति। नपुंसकलिङ्गे स्वादिप्रत्ययविवक्षायां ह्रस्वविधानार्थं सूत्रमिदं प्रारभ्यते-

[१४.८] ह्रस्वो नपुंसके प्रातिपदिकस्य॥ (१.२.४७)

सूत्रार्थः- क्लीबे प्रातिपदिकस्य अजन्तस्य ह्रस्वः स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। ह्रस्वः नपुंसके प्रातिपदिकस्य इति छेदः। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। ह्रस्वः इति प्रथमैकवचनान्तं पदम्। नपुंसके इति सप्तम्येकवचनान्तं पदम्। प्रातिपदिकस्य षष्ठ्येकवचनान्तं पदम्। अचश्च इति परिभाषया ह्रस्वदीर्घप्लुतशब्दैः यत्र ह्रस्वदीर्घप्लुताः विधीयन्ते तत्र अचः इति षष्ठ्यन्तं पदमुपतिष्ठते। प्रकृतसूत्रेण ह्रस्वो नपुंसके प्रातिपदिकस्य इत्यनेन ह्रस्वशब्देन ह्रस्वविधानात् अत्रापि अचः इति षष्ठ्यन्तं पदम् उपतिष्ठते। तच्च प्रातिपदिकस्य इत्यस्य विशेषणं भवति। तेन तदन्तविधिना अजन्तस्य प्रातिपदिकस्य इत्यर्थः लभ्यते। प्रातिपदिकस्य इत्यत्र षष्ठीश्रवणात् अलोऽन्त्यस्य परिभाषया अन्त्यस्य अलः ह्रस्वादेशः विधीयते। तेन अस्य सूत्रस्य नपुंसकलिङ्गे विद्यमानस्य अजन्तस्य प्रातिपदिकस्य ह्रस्वो भवति इति सूत्रार्थो लभ्यते।

उदाहरणम्- श्रीपम्।

सूत्रार्थसमन्वयः - श्रीपाशब्दात् नपुंसकलिङ्गे सुबुत्पत्तिविवक्षायां अनेन सूत्रेण अजन्तस्य अङ्गस्य ह्रस्वे आकारस्य अकारे श्रीप इति प्रातिपदिकं भवति। ततः प्रथमैकवचने सुप्रत्यये अनुबन्धलोपे श्रीप स् इति स्थितिः भवति। ततः स्वमोर्नपुंसकात् इत्यनेन सूत्रेण सुप्रत्ययस्य लुक् प्राप्नोति। तं प्रबाध्य अतोऽम् इत्यनेन अमादेशे श्रीप अम् इति स्थितिः भवति। ततः अतोऽम् इत्यनेन सूत्रेण पूर्वरूपैकादेशे श्रीपम् इति रूपं भवति।

द्विवचनविवक्षायां औप्रत्यये ज्ञानशब्दवत् श्रीपे इति रूपं सिद्ध्यति।

बहुवचने जस्प्रत्यये ह्रस्वे श्रीप जस् इति जाते जश्शसोः शिः इत्यनेन सूत्रेण जसः शि-इत्यादेशे अनुबन्धलोपे श्रीप इ इति स्थितिः भवति। ततः शि-इत्यस्य शि सर्वनामस्थानम् इत्यनेन सूत्रेण सर्वनामस्थानसंज्ञा भवति। ततः नपुंसकस्य झलचः इत्यनेन सूत्रेण अजन्ताङ्गस्य क्लीबस्य सर्वनामस्थाने परे नुमागमे श्रीप न् इ स्थितिः भवति। ततः नान्तस्य उपधायाः असंम्बुद्धौ सर्वनामस्थाने परे सर्वनामस्थाने चासम्बुद्धौ इत्यनेन सूत्रेण दीर्घे आकारे श्रीपा नि इति स्थितिः भवति। तदा -

[१४.९] एकाजुत्तरपदे णः॥ (८.४.१२)

सूत्रार्थः- एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। एकाजुत्तरपदे णः इति छेदः। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। एकाजुत्तरपदे इति सप्तम्येकवचनान्तं पदम्। एकः अच् यस्मिन् तद् एकाच्, तद् उत्तरपदं यस्य स एकाजुत्तरपदः, तस्मिन् एकाजुत्तरपदे इति बहुव्रीहिगर्भो बहुव्रीहिसमासः। समासस्य एव उत्तरपदं भवति। तेन उत्तरपदशब्देन समासः इति लभ्यते। णः इति प्रथमैकवचनान्तं पदम्। रषाभ्यां नो णः समानपदे इति सूत्रम् अनुवर्तते। पूर्वपदात्संज्ञायामगः इत्यस्मात् सूत्रात् पूर्वपदात् इति पञ्चम्यन्तं पदम् अनुवर्तते। पूर्वं पदं यस्य तत्पूर्वपदम् इति बहुव्रीहिसमासः। प्रातिपदिकान्तनुम्विभक्तिषु च इति सूत्रम् अनुवर्तते। प्रातिपदिकस्य अन्तः प्रातिपदिकान्तः इति षष्ठीतत्पुरुषसमासः। तेन अस्य सूत्रस्य पूर्वपदभ्यां रषाभ्यां परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णत्वं भवति इत्यर्थो भवति।

उदाहरणम्- श्रीपाणि।

सूत्रार्थसमन्वयः - पूर्वसूत्रोक्तप्रकारेण श्रीपा नि इति स्थितिः भवति। अत्र श्रीपा इति एकं पदं नि इति अपरं पदम्। अतः श्रीपा नि इत्यत्र एकपदाभावात् अट्कुप्वाङ्नुम्व्यवायेऽपि इत्यनेन सूत्रेण नकारस्य णत्वे अप्राप्ते एकपदाभावेऽपि श्रीपा नि इत्यत्र पूर्वपदस्थात् रेफात् परस्य णकारस्य अनेन सूत्रेण णकारेण श्रीपाणि इति रूपं भवति।

द्वितीयादिविभक्तिषु ज्ञानशब्दवत् श्रीपम्, श्रीपे, श्रीपाणि, श्रीपेण, श्रीपाभ्याम्, श्रीपैः, श्रीपाय, श्रीपाभ्याम्, श्रीपेभ्यः, श्रीपात्, श्रीपाभ्याम्, श्रीपेभ्यः, श्रीपस्य, श्रीपयोः, श्रीपाणाम्, श्रीपे, श्रीपयोः श्रीपेषु, हे श्रीप, हे श्रीपे, हे श्रीपाणि इत्यादीनि रूपाणि भवन्ति।

पाठगतप्रश्नाः-२

७. शि-इत्यादेशस्य सर्वनामस्थानसंज्ञा विधायकं सूत्रं किम्?

८. ज्ञानानि इत्यत्र नुमागमः केन सूत्रेण विधीयते?

९. ज्ञानानि इत्यत्र उपधादीर्घः केन सूत्रेण विधीयते?

१०. श्रीपम् इत्यत्र ह्रस्वः केन सूत्रेण विधीयते?

११. श्रीपाणि इत्यत्र णत्वं केन सूत्रेण विधीयते?

१२. एकाजुत्तरपदे णः इत्यस्य सूत्रस्य अर्थं लिखत।

।।वारि।।

[१४.१०] स्वमोर्नपुंसकात्॥ (७.१.२३)

सूत्रार्थः- क्लीबादङ्गात् परयोः स्वमोर्लुक् स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। स्वमोः नपुंसकात् इति छेदः। अस्मिन् सूत्रे द्वे पदे स्तः। स्वमोः इति षष्ठीद्विवचनान्तं पदम्। सुश्च अम् च इति स्वमौ तयोः स्वमोः इति इतरेतरयोगद्वन्द्वसमासः। नपुंसकात् इति पञ्चम्येकवचनान्तं पदम्। षड्भ्यो लुक् इत्यस्मात् लुगिति प्रथमान्तं पदमनुवर्तते। अङ्गस्य इत्यधिकारे सूत्रमिदं वर्तते। तच्च प्रातिपदिकात् इत्यत्र अन्वेति। तेन अस्य सूत्रस्य नपुंसकलिङ्गात् अङ्गात् परयोः सुप्रत्ययस्य अम्प्रत्ययस्य च लुक् भवति इत्यर्थो लभ्यते।

विशेषविचारः- अत्र संशयः तावत् आदेः परस्य इत्यनेन अयं लुक् अमः अकारस्य स्थाने किमर्थं न भवति। अत्र समाधानरूपेण उच्यते प्रत्ययस्य लुक्श्लुलुपः इत्यनेन सूत्रेण विधीयमाणः लुक् प्रत्ययस्य अदर्शनस्य नामान्तरम्। अत्र अमः लुक् करणीयः न तु अमः अकारस्य अथवा मकारस्य। सम्पूर्णस्य अम्समुदायस्य एव प्रत्ययसंज्ञा विद्यते। अतः सम्पूर्णस्य अमः एव अदर्शनं कुर्मः चेदेव लुक् सार्थकः भवति अन्यथा न। अतः सम्पूर्णस्य अमः एव लुक् करणीयः न तु अकारस्य।

उदाहरणम्- वारि।

सूत्रार्थसमन्वयः - जलार्थकस्य नित्यं नपुंसके वर्तमानस्य अव्युत्पन्नस्य वारिशब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततः प्रथमैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे वारि स् इति स्थितिः भवति। ततः स्वमोर्नपुसकात् इत्यनेन सूत्रेण नपुंसकलिङ्गात् अङ्गात् परस्य लुकि वारि इति रूपं भवति।

[१४.११] प्रत्ययस्य लुक्श्लुलुपः॥ (१.१.६१)

सूत्रार्थः- लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्याद्।

सूत्रव्याख्या- इदं संज्ञासूत्रम्। प्रत्ययस्य लुक्श्लुलुपः इति छेदः। अस्मिन् सूत्रे पदद्वयं विद्यते। प्रत्ययस्य इति षष्ठ्येकवचनान्तं पदम्। अदर्शनं लोपः इत्यस्मात् सूत्रात् अदर्शनम् इति प्रथमान्तं पदम् अनुवर्तते। लुक्श्लुलुपः इति प्रथमाबहुवचनान्तं पदम्। लुक् च श्लुश्च लुप् च इति लुक्श्लुलुपः इतरेतरयोगद्वन्द्वः। प्रत्ययस्य अदर्शनं लुक्श्लुलुप्संज्ञकं स्यादित्यर्थः प्रतीयते। लुक्श्लुलुपः इति द्विरावर्तते। आवृत्तस्य तृतीयान्ततया विपरिणामेन लुक्श्लुलुब्शद्बैः इत्यर्थो लभ्यते। एतस्य च अनुवर्तमानस्य अदर्शनम् इति पदेन अन्वयः भवति। ततश्च लुक् श्लु लुप् इत्युच्चार्य विहितं प्रत्ययस्य अदर्शनं यथासंख्यपरिभाषया क्रमाद् लुगादिसंज्ञा स्यादिति लभ्यते। तेन अस्य सूत्रस्य लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात् लुक्श्लुलुप्संज्ञं भवति इत्यर्थो लभ्यते।

[१४.१२] न लुमताङ्गस्य॥ (१.१.६३)

सूत्रार्थः- लुक् श्लु लुप् एते लुमन्तः। लुमताशब्देन लुप्ते तन्निमित्तम् अङ्गकार्यं न स्याद्।

सूत्रव्याख्या- इदं निषेधसूत्रम्। न लुमता अङ्गस्य इति छेदः। त्रिपदात्मकेऽस्मिन् सूत्रे न इति अव्ययपदम्। लुमता इति तृतीयैकवचनान्तं पदम्। लुः इत्येकदेशोऽस्तीति लुमान् तेन लुमता। लुशब्देन लुक्शब्दः, श्लुशब्दः, लुप्शब्दश्च इत्येतेषां ग्रहणं भवति। प्रत्ययलोपे प्रत्ययलक्षणम् इतीदं सूत्रम् प्रकृते अनुवर्तते। अङ्गस्य इति षष्ठ्येकवचनान्तं पदम्। अस्य सूत्रस्य अर्थः लुक् श्लु लुप् एते लुमन्तः। तेन अस्य सूत्रस्य लुक्श्लुलुप्-शब्दैः प्रत्ययलोपे विहिते सति प्रत्ययनिमित्तकम् अङ्गकार्यं न भवति इत्यर्थो लभ्यते।

उदाहरणम्- वारि।

सूत्रार्थसमन्वयः - अत्र वारिशब्दात् परस्य सुप्रत्ययस्य स्वमोर्नपुंसकात् इत्यनेन सूत्रेण अदर्शनम् अभवत्। तेन प्रत्ययलोपे प्रत्ययलक्षणम् इत्यनेन सूत्रेण प्रत्ययलक्षणे तदाश्रितं कार्यं प्राप्नोति। परन्तु अत्र सुप्रत्ययस्य अदर्शनं लुक्शब्देन भवति। तेन अनेन सूत्रेण प्रत्ययलक्षणस्य निषेधः भवति। तस्मात् प्रत्ययलक्षणे तदाश्रितं कार्यं न भवति।

[१४.१३] इकोऽचि विभक्तौ॥ (७.१.७३)

सूत्रार्थः- इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। इकः अचि विभक्तौ इति छेदः। अजादिविभक्तिः यदि परं तिष्ठति तर्हि इगन्तनपुंसकस्य नुमागमः भवतीति सामान्यसूत्रार्थः। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। इकः इति षष्ठ्येकवचनान्तं पदम्। अचि इति सप्तम्येकवचनान्तं पदम्। विभक्तौ इत्यपि सप्तम्येकवचनान्तं पदम्। इदितो नुम्धातोः इत्यस्मात् सूत्रात् नुमिति प्रथमान्तं पदम् अनुवर्तते। नपुंसकस्य झलचः इत्यस्मात् नपुंसकस्य इति षष्ठ्यन्तं पदम् अनुवर्तते। इकः इति नपुंसकस्य इत्यस्य विशेषणम्। तेन तदन्तविधिना इगन्तस्य नपुंसकस्य इति लभ्यते। अचि इत्यस्य तदादिविधिना अजादौ विभक्तौ इत्यर्थः जायते। तेन अस्य सूत्रस्य- जादिविभक्तिः परे तिष्ठति चेत् इगन्तनपुंसकस्य नुमागमः भवति इत्यर्थो लभ्यते। नुमः मित्करणात् लिङ्गात् इदम् आगमविधिः इति ज्ञायते। नुमः मित्त्वात् अयम् अन्तिमात् अचः परं भवति।

उदाहरणम्- वारिणी।

सूत्रार्थसमन्वयः - वारिशब्दस्य प्रथमाद्विवचने औप्रत्यये तस्य शी-इत्यादेशे अनुबन्धलोपे वारि ई इति स्थितिः भवति। वारिशब्दः इगन्तः नपुंसकशब्दः। तस्य अजादिविभक्तौ परे प्रकृतसूत्रेण नुमागमे अनुबन्धलोपे वारि न् ई इति स्थितिः भवति। ततः अट्कुप्वाङ्नुम्व्यवायेऽपि इत्यनेन णत्वे कृते वारिणी इति रूपं सिद्ध्यति।

प्रथमाबहुवचनविवक्षायां जस्प्रत्यये अनुबन्धलोपे वारि अस् इति स्थितिः भवति। ततः जश्शसोः शि इत्यनेन शि-इत्यादेशे अनुबन्धलोपे वारि इ इति स्थितिः भवति। शि-इत्यस्य शि सर्वनामस्थानम् इत्यनेन सर्वनामसंज्ञा भवति। ततः इकोऽचि विभक्तौ इत्यनेन सूत्रेण नुमागमे अनुबन्धलोपे वारि न् इ इति स्थितिः भवति। ततः सर्वनामस्थाने चासम्बुद्धौ इत्यनेन सूत्रेण उपधादीर्घे नकारस्य णत्वे च वारीणि इति रूपं सिद्ध्यति। वारिशब्दस्य द्वितीयाविभक्तौ अपि प्रथमावत् रूपाणि भवन्ति।

वारिशब्दस्य सम्बोधनैकवचने सुप्रत्यये अनुबन्धलोपे हे वारि सु इति स्थितिः भवति। ततः स्वमोर्नपुंसकात् इत्यनेन सूत्रेण सुप्रत्ययस्य लुकि हे वारि इति रूपं भवति। ततः प्रत्ययलोपे प्रत्ययलक्षणम् इत्यनेन सूत्रेण प्रत्ययलक्षणम् आश्रियं ह्रस्वस्य गुणः इत्यनेन सूत्रेण ह्रस्वस्य इकारस्य गुणः प्राप्नोति। परन्तु अत्र सुप्रत्ययस्य लुका लुक् जातः। तेन न लुमताङ्गस्य इत्यनेन प्रत्ययलक्षणस्य निषेधः भवति। परन्तु न लुमताङ्गस्य इति निषेधः अनित्यः अस्ति। तेन गुणे एकारे हे वारे स् इति स्थितिः भवति। ततः एङ्ह्रस्वात्सम्बुद्धेः इत्यनेन सम्बुद्धेः लोपे हे वारे इति रूपं सिद्ध्यति। किञ्च निषेधस्य नित्यत्वपक्षे तु प्रत्ययलक्षणस्य अभावात् तदाश्रयं कार्यं न भवति। तेन गुणाभावे हे वारि इति रूपं सिद्ध्यति।

सम्बोधने द्विवचने औप्रत्यये पूर्ववत् हे वारिणी इति रूपं भवति। बहुवचने जस्प्रत्यये च हे वारीणि इति रूपं सिद्ध्यति।

तृतीयैकचवने टाप्रत्यये अनुबन्धलोपे वारि आ इति स्थितिः भवति। अत्र इकोऽचि विभक्तौ इत्यनेन नुमागमः किञ्च आङो नास्त्रियाम् इत्येनन नादेशः युगपत् प्राप्तः। अत्र परत्वात् विप्रतिषेधे परं कार्यम् इत्यनेन नियमेन आङो नास्त्रियाम् इत्यनेन सूत्रेण नादेशे तस्य णत्वे वारिणा इति रूपं सिद्ध्यति।

द्विवचने भ्याम्प्रत्यये वारिभ्याम् इति रूपं भवति बहुवचने भिस्प्रत्यये सकारस्य रुत्वे विसर्गे च वारिभिः इति रूपं भवति।

चतुर्थ्येकवचने ङेप्रत्यये अनुबन्धलोपे वारि ए इति स्थितिः भवति। वारिशब्दः इकारन्तः अस्ति। तस्मात् शेषो घ्यसखि इत्यनेन सूत्रेण अस्य घिसंज्ञा भवति। ततः इकोऽचि विभक्तौ इत्यनेन सूत्रेण प्राप्तं नुमागमं बाधित्वा परत्वात् घेर्ङिति इत्यनेन सूत्रेण इकारस्य गुणः प्राप्नोति। वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन इत्यनेन वार्तिकेन परमपि गुणं प्रबाध्य नुमागमे वारिन् ए इति स्थितिः भवति। ततः नकारस्य णत्वे वारिणे इति रूपं भवति।

चतुर्थीद्विवचने भ्याम्प्रत्यये वारिभ्याम् इति रूपं सिद्ध्यति। बहुवचने भ्यस्प्रत्यये सकारस्य रुत्वे विसर्गे च वारिभ्यः इति रूपं सिद्ध्यति।

पञ्चम्येवचने ङसिप्रत्यये अनुबन्धलोपे वारि अस् इति स्थितिः भवति। ततः इकोऽचि विभक्तौ इत्यनेन सूत्रेण प्राप्तं नुमागमं बाधित्वा परत्वात् घेर्ङिति इत्यनेन सूत्रेण इकारस्य गुणः प्राप्नोति। ततः वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन इत्यनेन वार्तिकेन परमपि गुणं प्रबाध्य नुमागमे अनुबन्धलोपे वारिन् अस् इति स्थितिः भवति। ततः नकारस्य णत्वे सकारस्य रुत्वे विसर्गे च वारिणः इति रूपं भवति।

पञ्चमीद्विवचने भ्याम्प्रत्यये वारिभ्याम् इति रूपं सिद्ध्यति। बहुवचने भ्यस्प्रत्यये वारिभ्यः इति रूपं भवति।

षष्ठ्येकवचने ङस्प्रत्यये अनुबन्धलोपे पूर्ववत् परमपि गुणं वाधित्वा नुमागमे सकारस्य रुत्वे विसर्गे च वारिणः इति रूपं सिद्ध्यति।

षष्ठीद्विवचने ओस्प्रत्यये वारि ओस् इति जाते इको यणचि इत्यनेन सूत्रेण यणादेशः प्राप्तः। तं प्रबाध्य इकोऽचि विभक्तौ इत्यनेन नुमागमे अनुबन्धलोपे नकारस्य णत्वे वारिणोः इति रूपं सिध्यति।

षष्ठीबहुवचने आम्प्रत्यये वारि आम् इति स्थितिः भवति। ततः इकोऽचि विभक्तौ इत्यनेन नुमागमः प्राप्तः। परत्वात् तं बाधित्वा ह्रस्वनद्यापो नुट् इत्यनेन नुडागमः प्राप्नोति। परन्तु वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन इत्यनेन वार्तिकेन परमपि नुडागमं प्रबाध्य नुमागमे वारिन् आम् इति स्थितिः भवति। ततः नामि इत्यनेन दीर्घे णत्वे वारीणाम् इति रूपं भवति।

सप्तम्येकवचने ङिप्रत्यये अनुबन्धलोपे वारि इ इति स्थितिः भवति। ततः अच्च घेः इत्यनेन सूत्रेण औत्वं प्राप्तम्। किञ्च इकोऽचि विभक्तौ इत्यनेन नुमागमः प्राप्तः। परत्वात् औत्वे प्राप्ते तं प्रबाध्य वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन इत्यनेन वार्तिकेन परमपि नुडागमं प्रबाध्य नुमागमे वारिन् इ इति स्थितिः भवति। ततः णत्वे वारिणि इति रूपं भवति।

द्विवचने ओस्प्रत्यये पूर्ववत् वारिणोः इति रूपं भवति। बहुवचने सुप्प्रत्यये सकारस्य आदेशप्रत्यययोः इत्यनेन षत्वे वारिषु इति रूपं सिद्ध्यति। इति वारिशब्दः समाप्तः।

पाठगतप्रश्नाः-३

१३. स्वमोर्नपुंसकात् इति सूत्रस्य अर्थं लिखत।

१४. वारि इत्यत्र सुप्रत्ययस्य लुक् केन सूत्रेण अभवत्?

१५. लुमन्ताः के?

१६. कदा प्रत्ययलोपेऽपि प्रत्ययाश्रितं कार्यं न भवति?

१७. वारीणि इत्यत्र नुमागमः केन सूत्रेण विधीयते?

१८. वारिशब्दस्य सम्बोधनैकवचने कति रूपाणि भवन्ति?

।।दधि।।

अथ दधिशब्दः। नित्यं नपुंसके वर्तमानस्य अव्युत्पन्नस्य अजन्तस्य दधिशब्दस्य अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदिकसंज्ञा भवति। ततः प्रथमैकवचनविवक्षायां सुप्रत्यये वारिशब्दवत् दधि इति रूपं भवति। द्विचवने औप्रत्यये दधिनी इति रूपं भवति। बहुवचने जस्प्रत्यये दधीनि इति रूपं भवति। द्वितीयायां च पूर्ववत् दधि, दधिनी, दधीनि इत्यादीनि रूपाणि भवन्ति।

दधिशब्दस्य सम्बोधनैकवचने सुप्रत्यये अनुबन्धलोपे हे दधि सु इति स्थितिः भवति। ततः न लुमताङ्गस्य इति निषेधस्य अनित्यपक्षे प्रत्ययलक्षणस्य निषेधाभावे वारिशब्दवत् हे दधे रूपं भवति। किञ्च निषेधस्य नित्यत्वपक्षे प्रत्ययलक्षणस्य अभावात् हे दधि इति रूपं भवति।

सम्बोधने द्विवचने औप्रत्यये पूर्ववत् हे दधिनी इति रूपं भवति। बहुवचने जस्प्रत्यये च हे दधीनि इति रूपं सिद्ध्यति।

सूत्रावतरणम्- दधिशब्दस्य तृतीयैकवचने टाप्रत्यये वारि टा इति स्थितिः भवति। ततः शेषो घ्यसखि इत्यनेन सूत्रेण दधिशब्दस्य घिसंज्ञा भवति। घिसंज्ञायाम् आङो नास्त्रियाम् इत्यनेन टा-इत्यस्य नादेशे प्राप्ते सूत्रमिदम् आरभ्यते।

[१४.१४] अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः॥ (७.१.७५)

सूत्रार्थः- एषामनङ् स्याट्टादावचि स चोदात्तः इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्थिदधिसक्थ्यक्ष्णाम् अनङ् उदात्तः इति छेदः। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। अस्थिदधिसक्थ्यक्ष्णाम् इति षष्ठीबहुवचनान्तं पदम्। अस्थि च दधि च सक्थि च अक्षि च इति अस्थिदधिसक्थ्यक्षीणि इति इतरेतरयोगद्वन्द्वः, तेषाम् अस्थिदधिसक्थ्यक्ष्णाम्। अनङ् इति प्रथमैकवचनान्तं पदम्। अनङः ङकारस्य इत्संज्ञा भवति, अकारश्च उच्चरणार्थकः। ङित्वात् ङिच्च इति

परिभाषया अन्तादेशः भवति। तेन अयम् आदेशविधिः इति निश्चीयते। उदात्तः इति प्रथमैकवचनान्तं पदम्। इकोऽचि विभक्तौ इत्यस्मात् सूत्रात् अचि इति विभक्तौ चेति सप्तम्यन्ते पदे अनुवर्तेते। तयोश्च बहुवचनान्ततया वचनविपरिणामः भवति। तेन अक्षु विभक्तिषु इत्यर्थो लभ्यते। अक्षु इत्यस्मात् तदन्तविधौ अजादिषु तृतीयादिषु विभक्तिषु इत्यर्थः जायते। तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य इत्यस्मात् सूत्रात् तृतीयादिषु इति सप्तम्यन्तं पदम् अनुवर्तते। तेन अस्य सूत्रस्य अजादिषु तृतीयादिषु विभक्तिषु अस्थिदधिसक्थ्यक्ष्णाम् अनङादेशो भवति स च उदात्तः इत्यर्थो भवति।

उदाहरणम्- दध्ना।

तृतीयैकवचने टाप्रत्यये अनुबन्धलोपे दधि आ इति स्थितिः भवति। अजादिप्रत्ययः परे अस्ति। तेन अनेन सूत्रेण अन्त्यस्य इकारस्य अनङादेशे अनुबन्धलोपे दधन् आ इति स्थितिः भवति। तदा -

[१४.१५] अल्लोपोऽनः॥ (६.४.१३४)

सूत्रार्थः- अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्य अकारस्य लोपः स्याद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। अत् लोपः अनः इति छेदः। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। अत् इति लुप्तषष्ठ्येकवचनान्तं पदम्। सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः इत्यनेन सूत्रेण षष्ठीविभक्तेः लुक् जातः। लोपः इति प्रथमैकवचनान्तं पदम्। अनः इति अवयवषष्ठ्यन्तम् अत् इत्यस्य विशेषणम्। तेन अनः अववयो योऽकारः तस्य इत्यर्थः लभ्यते। अङ्गस्य इत्यधिकृतम् इह अवयवषष्ठ्यन्तम् आश्रीयते। तच्च अनः इत्यत्र अन्वेति। तेन अङ्गावयवो यः अन् तदवयवस्य अकारस्य लोपः इति। भस्य इत्यधिक्रियते। तच्च अनः इत्यत्र अन्वेति। ततश्च अनः असर्वनामस्थान-यजादिस्वादिपरत्वं लभ्यते। तेन अस्य सूत्रस्य अङ्गावयवः असर्वनामस्थानयजादिस्वादिपरो यः अन् तस्य अकारस्य लोपः भवति इत्यर्थः भवति।

उदाहरणम् - दध्ना।

सूत्रार्थसमन्वयः - तृतीयैकवचने टाप्रत्यये अनङादेशे दधन् आ इति स्थितिः भवति। ततः अनेन सूत्रेण अजादिप्रत्यये परे अनः अकारस्य लोपे दध्न् आ इति स्थितिः भवति। ततः वर्णसम्मेलने दध्ना इति रूपं सिध्यति।

दधिशब्दस्य तृतीयाद्विचवने भ्याम्प्रत्यये दधिभ्याम् इति रूपं बहुवचने भिस्प्रत्यये दधिभिः इति रूपं भवति।

चतुर्थ्येकवचने ङेप्रत्यये अनुबन्धलोपे पूर्ववत् अनङादेशे, अनः अकारस्य लोपे दध्ने इति रूपं भवति। द्विचवने भ्याम्प्रत्यये दधिभ्याम् इति रूपं सिध्यति। बहुवचने भ्यस्प्रत्यये दधिभ्यः इति रूपं भवति।

पञ्चम्येकवचने ङसिप्रत्यये अनुबन्धलोपे पूर्ववत् अनङादेशे, अनः अकारस्य लोपे दध्नः इति रूपं भवति। द्विचवने भ्याम्प्रत्यये दधिभ्याम् इति रूपं सिध्यति। बहुवचने भ्यस्प्रत्यये दधिभ्यः इति रूपं भवति।

षष्ठ्येकवचने ङस्प्रत्यये अनुबन्धलोपे पूर्ववत् अनङादेशे, अनः अकारस्य लोपे दध्नः इति रूपं भवति। द्विचवने ओस्प्रत्यये पूर्ववत् अनङादेशे, अनः अकारस्य लोपे सकारस्य रुत्वे विसर्गे च दध्नोः इति रूपं भवति। बहुवचने आम्प्रत्यये पूर्ववत् अनङादेशे, अनः अकारस्य लोपे दध्नाम् इति रूपं भवति।

[१४.१६] विभाषा ङिश्योः॥ (६.४.१३६)

सूत्रार्थः- अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्य अकारस्य लोपो वा स्याद् ङिश्योः परयोः इति।

सूत्रव्याख्या- इदं विधिसूत्रम्। विभाषा ङिश्योः इति छेदः। विभाषा इति विकल्पार्थकमव्ययपदम्। ङिश्योः इति सप्तमीद्विवचनान्तं पदम्। ङिश्च शी च इति ङिश्यौ इतरेतरयोगद्वन्द्वसमासः, तयोः ङिश्योः। अल्लोपोऽनः इति सूत्रम् अनुवर्तते। अनः इति अवयवषष्ठ्यन्तम् अत् इत्यस्य विशेषणम्। तेन अनः अववयो योऽकारः तस्य इत्यर्थः लभ्यते। अङ्गस्य इत्यधिकृतम् इह अवयवषष्ठ्यन्तम् आश्रीयते। तच्च अनः इत्यत्र अन्वेति। तेन अङ्गावयवो यः अन् तदवयवस्य अकारस्य लोपः इति। भस्य इत्यधिक्रियते। तच्च अनः इत्यत्र अन्वेति। ततश्च अनः असर्वनामस्थान-यजादिस्वादिपरत्वं लभ्यते। शी-इत्यनेन नपुंसकाच्च इत्यनेन विहितः शी एवात्र गृह्यते न तु जश्शसोः शिः। शि सर्वनामस्थानम् इत्यनेन शि-इत्यस्य सर्वनामस्थानसंज्ञा भवति। तेन शिपरे भसंज्ञायाः अभावात् इदं सूत्रं तत्र न प्रवर्तते। तेन अस्य सूत्रस्य अङ्गावयवः असर्वनामस्थानयजादिस्वादिपरो यः अन् तस्य अकारस्य लोपः ङिश्योः परयोः विकल्पेन भवति इत्यर्थः भवति।

उदाहरणम् - दध्नि।

सूत्रार्थसमन्वयः - सप्तम्येकवचने ङिप्रत्यये अनुबन्धलोपे अनङादेशे दधन् इ इति स्थिते तत्र अनः अकारस्य अल्लोपोऽनः इति नित्यं लोपे प्राप्ते तं प्रबाध्य अनेन सूत्रेण विकल्पेन अङ्गावयवस्य अनः अकारस्य लोपे दध्नि इति रूपं सिध्यति। विकल्पेन लोपाभावपक्षे दधनि इति रूपं सिध्यति।

सप्तमीद्विचवने ओस्प्रत्यये पूर्ववत् अनङादेशे, अनः अकारस्य लोपे सकारस्य रुत्वे विसर्गे च दध्नोः इति रूपं भवति। बहुचवने सुप्प्रत्यये सकारस्य मूर्धन्यादेशे दधिषु इति रूपं सिध्यति।

पाठगतप्रश्नाः-४

१९. दधिशब्दस्य केन सूत्रेण प्रातिपदिकसंज्ञा विधीयते?

२०. दधिशब्दस्य सम्बोधनैकवचने कति रूपाणि भवन्ति?

२१. अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः इत्यनेन सूत्रेण कः आदेश विधीयते?

२२. दध्ना इत्यत्र अनः अकारस्य लोपः केन सूत्रेण अभवत्?

२३. अल्लोपोऽनः इति सूत्रस्य अर्थं लिखत।

२४. विभाषा ङिश्योः इत्यनेन सूत्रेण किं विधीयते?

पाठसारः

अस्मिन् पाठे नपुंसकशब्दानां रूपाणि कथं भवन्ति इति पर्यालोचितम्। यद्यपि नपुंसकशब्दानां प्रायः पुंलिङ्गवत् रूपाणि भवन्ति तथापि येषु स्थलेषु भिन्नता परिलक्ष्यते तानि स्थलानि विस्तरेण पर्यालोचितानि। आदौ ज्ञानशब्दस्य रूपाणि कथं भवन्ति तत् विवृतम्। ततः कुत्र प्रत्ययलोपे प्रत्ययाश्रितं कार्याणि न भवन्ति तानि स्थलानि विस्तरेण प्रतिपादितानि। ततः नपुंसके ह्रस्वविधायकं सूत्रं प्रतिपादितम्। ततः नुमागमः कुत्र भवति तत् प्रतिपादितम्। ततः दधिशब्दस्य प्रतिपादनकाले अजादौ प्रत्यये परे अनः अकारस्य लोपः कथं भवति तदालोचितम्। एतानि सर्वाणि अपि अस्मिन् पाठे विस्तरेण प्रतिपादितानि।

पाठान्तप्रश्नाः

१. अतोऽम् इति सूत्रं व्याख्यात।

२. नपुंसकस्य झलचः इति सूत्रं व्याख्यात।

३. सर्वनामस्थाने चासम्बुद्धौ इति सूत्रं व्याख्यात।

४. ह्रस्वो नपुंसके प्रातिपदिकस्य इति सूत्रं व्याख्यात।

५. एकाजुत्तरपदे णः इति सूत्रं व्याख्यात।

६. स्वमोर्नपुंसकात् इति सूत्रं व्याख्यात।

७. इकोऽचि विभक्तौ इति सूत्रं व्याख्यात।

८. अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः इति सूत्रं व्याख्यात।

९. अल्लोपोऽनः इति सूत्रं व्याख्यात।

१०. रूपाणि ससूत्रं साधयत – ज्ञानानि हे ज्ञाने श्रीपाणि वारीणि विरणे दध्ना ।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. अतोऽम् इत्यनेन।

२. स्वमोर्नपुंसकात् इत्यस्य।

३. क्लीबात्परस्यौङः शी स्याद्।

४. औङः शी-इत्यादेशः विधीयते।

५. जश्शसोः शिः इत्यनेन।

६. भस्य इवर्णावर्णयोः लोपः स्यादीकारे तद्धिते च परे इति।

उत्तराणि-२

७. शि सर्वनामस्थानम् इत्यनेन।

८. नपुंसकस्य झलचः इत्यनेन।

९. सर्वनामस्थाने चासम्बुद्धौ इत्यनेन।

१०. ह्रस्वो नपुंसके प्रातिपदिकस्य इत्यनेन।

११. एकाजुत्तरपदे णः इत्यनेन।

१२. एकाजुत्तपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्याद्।

उत्तराणि-३

१३. क्लीबादङ्गात् परयोः स्वमोर्लुक् स्याद्।

१४. स्वमोर्नपुंसकात् इत्यनेन।

१५. लुक् श्लु लुप् एते लुमन्तः।

१६. लुमताशब्देन लुप्ते प्रत्ययाश्रितं कार्यं न भवति।

१७. इकोऽचि विभक्तौ इत्यनेन।

१८. द्वे रूपे स्तः। हे वारि, हे वारे इति।

उत्तराणि-४

१९. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इत्यनेन।

२०. द्वे रूपे स्तः। हे दधे, हे दधि इति।

२१. अनङादेशः।

२२. अल्लोपोऽनः इत्यनेन।

२३. अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्य अकारस्य लोपः स्याद्।

२४. ङिश्योः परयोः अनः अकारस्य विकल्पेन लोपो विधीयते।

।।इति चतुर्दशः पाठः।।